"ततो बलमिति ख्यातं विज्ञाय दृढ़ध्वन्विनाम्।
दूषित: सहसा भावो धृतराष्ट्रस्य पाण्डुषु॥")
मैथुनापवादयुक्त:। तत्पर्य्याय:। अभिशस्त: २ वाच्य: ३ चारित: ४। इति हेमचन्द्र:।३।१००॥ आचारित: ५। इति शब्दरत्नावली॥

दूषिता, स्त्री, (दूषित+टाप्।) दूषणप्राप्ता कन्या। तत्पर्य्याय:। सखेदा २ धर्षकारिणी ३ प्रमादिका ४। इति शब्दरत्नावली॥

दूषी, स्त्री, (दूषि+"कृदिकारादिति।" वा ङीष्।) दूषिका। इत्यमरटीकायां भरत:॥

दूषीका, स्त्री, (दूषयतीति+दूषि+"कषिदूषिभ्यामीकन्।" उणा ४।१६। इति। ईकन् ततष्टाप्।) दूषिका। इति शब्दरत्नावली॥

दूषीविषं, क्ली, (दूषयतीति। दूषि+बाहुलकात् ईः। तत: कर्म्मधारय:।) औषधादिभिरवीर्य्य विषम्। इति हेमचन्द्र:।४।३८०॥ आदियदातदावाग्निवायुरौद्रशोषितविषम्। स्वभावतो गुणहीनं विषम्। अस्य गुण:। उदररोगशोथगुल्मकुष्ठप्रमेहनाशित्वम्। इति राजवल्लभ:॥ यथा,—
"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितं वा।
स्वभावतो वा गुणविप्रहीनं
विषं हि दूषीविषतामुपैति॥"
इति माधवकर:॥

दूष्यं, क्ली, (दूष्यते इति। दुष+णिच्+"अचो यत्।" ३।१।९७। इति यत्। "दोषो णौ।" ६।४।९०। इति उपधाया ऊत्वम्।) वस्त्रम्। वस्त्रगृहम्। इति मेदिनी। ये, ३१॥ पूयम्। इति हेमचन्द्र:।३।२९८॥

दूष्य:, त्रि, (दुष+णिच्+यत्।) दूषणीय:। इति मेदिनी। ये, ३१॥ (यथा, महाभारते।१३।१६५।३२।
"स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत्।
अदूष्या हि स्त्रियो रत्नमाप इत्येव धर्म्मत:॥")
निन्द्य:। इति त्रिकाण्डशेष:।३।३।३१३॥ यथा, कामन्दकीयनीतिसारे।६।६।
"राज्योपघातं कुर्व्वाणा ये पापा राजवल्लभा:।
एकैकश: संहता वा दूष्यांस्तान् परिचक्षते॥")

दूष्या, स्त्री, (दूष्यते इति। दुष+णिच्+यत्+टाप्।) हस्तिकक्ष्यरज्जु:। काचदड़ि इति भाषा॥ तत्पर्य्याय:। कक्षा २ वरत्रा ३। इति हेमचन्द्र:।४।२९८॥ चूषा ४। इत्यमर:।२।८।४२॥

दृ, ङ श आदरे। इति कविकल्पद्रुम:। (तुदा-आत्म'-सकं-अनिट्।) आदर: प्रीत्या सम्भ्रम:। ङ श, द्रियते गुरुं लोक:। मानुबन्धोऽयमित्येके। इति दुर्गादास:॥

दृक्, [श्] स्त्री, (पश्यत्यनेनेति। दृश्+करणे क्विप्।) चक्षु:। इत्यमर:।२।६।९४। (यथा, साहित्यदर्पणे।
"दृशा दग्धं मनसिजं जीवयन्ति दृशैव या:।
विरूपाक्षस्य जयिनीस्ता: स्तुमो वामलोचना:॥"
भावे क्विप्।) दर्शनम्। बुद्धि:। इति मेदिनी। शे, ८॥ (यथा, भागवते।२।६।५।
"तां नाध्यगच्छद्दृशमत्र सम्मतां
प्रपञ्चनिर्म्माणविधिर्य्यया भवेत्॥")

दृक्, [श्] त्रि, (पश्यतीति। दृश+कर्त्तरि क्विन्।) वीक्षक:। इति मेदिनी। शे, ८॥ (यथा, भागवते।४।२२।६।
"यथा सर्व्वदृशं सर्व्व आत्मानं येऽस्य हेतव:॥"
ज्ञाता। इति शब्दरत्नावली॥

दृकं, क्ली, (दीर्य्यते इति। दृ विदारे+बाहुलकात् कक् ह्रस्वश्च।) छिद्रम्। इति संक्षिप्तसारे उणादिवृत्ति:॥

दृकाण:, पुं, द्रेक्काण:। इति जातक:॥

दृक्कर्ण:, पुं, (दृशौ नेत्रावेव कर्णौ यस्य।) सर्प:। इति हेमचन्द्र:।४।३६९॥ यदाह कश्चित्।
"दृक्कर्णो मशक: शिला सरसिजं वायो जलौका: शुक:
शुभ्रांशुर्गणको कुलोत्तमबली पान्थो नभश्चातक:।
वादी चक्रचरो बको मधुलिहो लालाटिको लम्पट:
श्रीमद्भोज! भवन्तु विंशतिरमी त्वद्वैरिणां सेवका:॥")

दृक्काण:, पुं, द्रेक्काण:। इति ज्योतिषम्॥

दृक्प्रसादा, स्त्री, (दृशौ नेत्रौ प्रसादयतीति। दृश्+प्र+सद्+णिच्+अण्।) कुलत्था। कुलत्थाञ्जनम्। इति राजनिर्घण्ट:॥

दृक्प्रिया, स्त्री, (दृशोर्नेत्रयो: प्रिया।) शोभा। इति राजनिर्घण्ट:॥

दृक्श्रुति:, पुं, (दृशौ एव श्रुती कर्णौ यस्य।) सर्प:। इति हलायुध:॥

दृगध्यक्ष:, पुं, (दृशोर्नेत्रयोरध्यक्ष: अधिष्ठातृदेव:।) सूर्य्य:। इति शब्दार्थकल्पतरु:॥

दृग्गोल:, पुं, खगोलान्तर्गतगोलविशेष:। यथा,
"खस्वस्तिके चाध:स्वस्तिके चान्त:कीलकौ कृत्वा तयो: प्रोतं स्वयं दृङ्मण्डलं कार्य्यं तत् पूर्व्ववृत्तभ्य: किञ्चिन्न्यूनं कार्य्यं यथा खगोलान्तर्भ्रमति यद्येक एव ग्रहगोलस्तदैकमेव दृङ्मण्डलम्। यो यो ग्रहो यत्र यत्र वर्त्तते तस्य तस्योपरि परिभ्राम्यदेव विन्यस्य दृग्ज्याशङ्क्वादिकं दर्शनीयम्। अथवा पृथक् पृथग्ग्रहौ दृङ्मण्डलानि रचयेत्। तत्राष्टमं विभिन्नलग्नस्य तत्र दृक्क्षेपमण्डलं तस्मिन् खगोले ध्रुवचिह्नयोर्नलिकाद्वयं बद्ध्वा तन्नलिकाधारमेव खगोलाद्बहिरङ्गुलत्रयान्तरे दृग्गोलं रचयेत्। कथितै: खगोलवृत्तैर्वक्ष्यमाणैर्भगोलवृत्तै: क्रान्तिमण्डलाद्यैर्यो निबध्यते स दृग्गोल:। यतोऽस्या कुज्यासमशङ्क्वाद्यश्चैवाग्नि द्विगोलजातानि भगोलवृत्तानि खगोलवृत्तमिलितानि उत्पद्यन्ते गोलबन्धे सम्यङ्नोपलभ्यत इति दृग्गोल: कृत:।" इति सिद्धान्तशिरोमणि:॥

दृग्विष:, पुं, (दृशि नेत्रे विषं यस्य।) नाग:। इति हेमचन्द्र:।४।३७८॥

दृढ़ं, क्ली, (दृह वृद्धौ+क्तप्रत्ययेन निपातनात् साधु:।) लौहम्। इति शब्दचन्द्रिका॥ अतिशय:। इत्यमर:।३।१।७६॥

दृढ़:, त्रि, (दृह+क्त:। निपातनात् साधु:।) स्थूल:। अतिशय:। प्रगाढ़:। (यथा, देवीभागवते।१।६।३१।
"तदाकाशे श्रुतं ताभ्यां वाग्बीजं सुमनोहरम्।
गृहीतञ्च तदताभ्यां तस्याभ्यासो दृढ: कृत:॥")
बलवान्। इति मेदिनी। ढे, २॥ कठिन:। इत्यमर:।३।३।४४॥

दृढ़:, पुं, रूपकभेद:। यथा,—
"दृढ़: प्रौढ़ोऽथ खचरो विभवश्चतुरक्रम:।
निःशारुक: प्रतिताल: कथिता: सप्त रूपका:॥"
तल्लक्षणं यथा,—
"द्रुताख्य: स्यान्महुद्वन्द्वं तावे च हंसलीलके।
चतुर्द्दशाक्षरैर्युक्त: शृङ्गारे परिकीर्त्तित:॥"
इति सङ्गीतदामोदर:॥
(त्रयोदशमनो रौच्यस्य पुत्रविशेष:। यथा, हरिवंशे।७।८३।
"सुनेत्र: क्षत्रवृद्धिश्च सुतपा निर्भयो दृढ़:।
रौच्यस्यैते मनो: पुत्रा अन्तरे तु त्रयोदशे॥")

दृढ़कण्टक:, पुं, (दृढ़ानि कठिनानि कण्टकानि यस्य।) क्षुद्रफलकवृक्ष:। इति शब्दचन्द्रिका॥ धलआँकड़ा इति भाषा॥

दृढ़काण्डं, क्ली, (दृढ़ं काण्डं यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्ट:॥

दृढ़काण्ड:, पुं, (दृढ़: कठिन: काण्डो यस्य।) वंश:। इति राजनिर्घण्ट:॥

दृढ़काण्डा, स्त्री, (दृढ़: कठिन: काण्डो यस्या:।) पातालगरुडीलता। इति राजनिर्घण्ट:॥

दृढ़क्षुरा, स्त्री, (दृढ़: क्षुर इवाग्रभागो यस्या:। यद्वा, दृढ़: क्षुर इव फलमस्त्यस्या इति अर्शआदिभ्योऽच् ततष्टाप्।) वल्वजा। इति राजनिर्घण्ट:॥

दृढ़गात्रिका, स्त्री, (दृढ़ं गात्रमस्या:। कप्। ततष्टापि अत इत्वम्।) मत्स्यण्डी। इति शब्दचन्द्रिका॥

दृढ़ग्रन्थि:, पुं, (दृढ़ो ग्रन्थिर्यस्य।) वंश:। इति राजनिर्घण्ट:॥

दृढ़च्छदं, क्ली, (दृढ़च्छदो यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्ट:॥

दृढ़तरु:, पुं, (दृढ़स्तरुश्च:।) धववृक्ष:। इति राजनिर्घण्ट:॥

दृढ़त्वच:, पुं, (दृढ़ं कठिनं त्वचं यस्य।) मुञ्जतृणम्। इति राजनिर्घण्ट:॥

दृढ़त्वचा, स्त्री, (दृढ़ं त्वचं यस्या:।) वल्वजा। इति राजनिर्घण्ट:॥

दृढ़त्वक्, [च्] पुं, (दृढ़ा त्वक् यस्य।) यावनालशर:। इति राजनिर्घण्ट:॥

दृढ़दंशक:, पुं, (दृढ़ं यथा तथा दशतीति। दन्श+ण्वुल्।) जलजन्तुविशेष:। इति शब्दार्थकल्पतरु:॥ हाङ्गर इति भाषा॥